National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(66): 170-173
© 2026 NJHSR
www.sanskritarticle.com

**डॉ. सिद्धार्थशङ्करदाशः**
सहायकाचार्यः,
धर्मशास्त्रविद्याशाखा,
के.सं.वि.वि.श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. सिद्धार्थशङ्करदाशः**
सहायकाचार्यः,
धर्मशास्त्रविद्याशाखा,
के.सं.वि.वि.श्रीसदाशिवपरिसरः, पुरी

# धर्मशास्त्रदृष्ट्या वनस्पतीनां धार्मिक-पर्यावरणीय-स्थायिविकासपरकं महत्त्वम्

**डॉ. सिद्धार्थशङ्करदाशः**

**सारांशः**

भारतीयधर्मशास्त्रेषु वनस्पतयः केवलं धार्मिकोपयोगिनः पदार्थाः न, अपितु मानवजीवनस्य, पर्यावरणस्य, जैवविविधतायाः तथा सामाजिकसंस्कृतेः आधारभूततत्त्वानि इति प्रतिपादितम्। वर्तमानकाले जलवायुपरिवर्तनम्, वनविनाशः, जैवविविधतानाशः, पर्यावरणप्रदूषणं च वैश्विकसमस्यारूपेण विद्यमानम्। एतादृशे समये धर्मशास्त्रेषु प्रतिपादितं वृक्षारोपणम्, वृक्षसंरक्षणम्, पवित्रवनसंस्कृतिः, देववृक्षपूजनम्, व्रतपरम्परा च स्थायिविकासस्य (Sustainable Development) उत्कृष्टदृष्टान्ताः भवन्ति। अस्मिन् शोधलेखे धर्मशास्त्रीयग्रन्थानां आलोचनात्मकाध्ययनद्वारा वनस्पतीनां धार्मिक, पर्यावरणीय, सामाजिक तथा नैतिकमहत्त्वस्य आधुनिकसन्दर्भेषु विश्लेषणं कृतम्। अध्ययनस्य निष्कर्षः दर्शयति यत् धर्मशास्त्रीयवनस्पतिदर्शनम् आधुनिकपर्यावरणनीतिषु, पारिस्थितिकशिक्षायां तथा स्थायिविकासलक्ष्येषु प्रभावकरूपेण समाविष्टं भवेत् ।

**मुख्यशब्दाः**- धर्मशास्त्रम्, वनस्पतिः, वल्लरी, पर्यावरणम् पञ्चमङ्गदलः, स्थायिविकासः, जैवविविधता, वृक्षारोपणम्, SDGs. त्वज्सारः, गुल्मः, लता, वृक्षः, उद्भिदः ।

**प्रस्तावना-**

एकविंशतितमे शतके पर्यावरणसमस्या मानवसभ्यतायाः प्रमुखसमस्यास्वन्यतमा। संयुक्तराष्ट्र-सङ्घस्य Sustainable Development Goals (SDGs) मध्ये जलवायुसंरक्षणम्, भूमिसंरक्षणम्, जैवविविधतारक्षणञ्चेत्यादीनि प्रमुखस्थानानि संप्राप्तातानि। एवमेतासां समस्यानां समाधानं भारतीयधर्मशास्त्रेषु तु सहस्रवर्षपूर्वमेव यथा वृक्षपूजन- वृक्षारोपण-वनसंरक्षण-देववनव्यवस्थारूपेण च पर्यावरणसन्तुलनस्य माध्यमत्वेन प्रतिपादितम्। अतः धर्मशास्त्रेषु निहितं पर्यावरणदर्शनम् आधुनिकवैश्विकपरिप्रेक्ष्ये पुनः समीक्षितुं आवश्यकम् ।

**अनुसन्धानस्य उद्देश्यानि-**

1. धर्मशास्त्रेषु वनस्पतीनां धार्मिकमहत्त्वस्य विश्लेषणम् ।
2. पर्यावरणसंरक्षणे धर्मशास्त्रीयदृष्टेः अध्ययनम् ।
3. स्थायिविकासलक्ष्यैः (SDGs) सह धर्मशास्त्रीयसिद्धान्तानां तुलनात्मकमूल्यांकनम् ।
4. आधुनिकसमाजे धर्मशास्त्रीयवनस्पतिदर्शनस्य उपादेयता प्रतिपादनम् ।

**विषयोपस्थापनम्-**

प्राचीनभारते वनस्पतीन् प्रत्यत्यधिकमनुरागः आसीत्। एवमेतेषां महत्त्वं सर्वेषु कालेषु परिलक्ष्यते। धर्मशास्त्रेऽपि तेषां महत्त्वं मानवानां कृते अतीव प्रदीयते। तत्र मानवजीवने धार्मिक कृत्येषु एतेषां महत्त्वं सर्वथा दरीदृश्यते। तत्र धार्मिक कृत्येषु यज्ञपात्राणां निर्माणे, समिधूपेण, यज्ञमण्डपनिर्माणे, देवादिपूजने द्रव्यरूपेण च वहुविधं प्रयोगः वनस्पतीनामासीत्। तत्र सर्वप्रथमं वनस्पतेः लक्षणं महर्षिमनुना[1] प्रदत्तमस्ति यत् –

"अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः ।

पुष्पिणः फलिनश्चैव वृक्षास्तूभयतः स्मृताः ।।"
एते उद्भिज्जाः भवन्तीति कथितं तेनैव। उक्तं यत् –
"उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः ।।
महाभारते[2] वनस्पतयः षड्वर्गेः विभाजिताः।" यथा -

१. वृक्षः, २. लता, ३. वल्लरी ४. गुल्मः, ५. त्वज्सारः, ६. कुश-दूर्वादिः ।

वौधायनधर्मसूत्रे[3] पलाशवृक्षोऽतीव पवित्रवृक्षत्वेन मन्यते। यस्य पत्र-पुष्प-शाखा-काष्ठादयः यज्ञेषु प्रयुज्यन्ते। पुनश्च तदानीं वृक्षारोपण-स्यातीव धार्मिकचिन्तनमासीत्। यथा विष्णुधर्मसूत्रे कथ्यते यत् – आरोपिताः वृक्षाः परलोके पुत्रत्वेन जायन्ते। यथोक्तं तेन "वृक्षारोपभिवृक्षाः परलोके पुत्राः भवन्ति।"[4] इति अतः एतेषां वनस्पतीनां धार्मिकमहत्वं परिलक्ष्य एतेषां कर्तनमीन्धनार्थं न भवेदित्युक्तं स्पष्टरूपेण वृद्धहारीतेन[5]। हेमाद्रि[6] मतेन अश्वत्थ-अशोक-अञ्जलिका-दाडिमादिवृक्षरोपणेन क्रमशः सम्पत्तिः, पापाद्युक्तिः, दीर्घायुः, सुशीला, सती आदि प्राप्यन्ते। पुनश्च तत्र वाटिका निर्माणेन तथा दानेन महत्पुण्यं भवतीति कथितमस्ति[7]। वसिष्ठधर्मसूत्रानुसारं तथा विष्णुधर्मसूत्रानुसारं फलीनां पुष्पिणाञ्च वृक्षाणां कर्तने दण्डनीयोऽपराधो भवति[8]। तथैव वैसम्पायनगृह्यसूत्रे[9] वृक्षारोपणेन वाटिकानिर्माणेन वाटिकादानेन च महपुण्यं प्राप्यते इत्युक्तमस्ति। कृत्यकल्पतरौ तथा चतुवर्गचिन्तामणौ आम्र-अश्वत्थ-वट-प्लक्ष-उदुम्बरादिपञ्चवृक्षाः "पञ्चमङ्गदल"[10] इति कथ्यन्ते। अर्थादेतेषां पूजनं तथा एतेषां पुष्पपत्राणि देवपूजने च परमपवित्राणीति मन्यते। अत्र उदुम्बरवृक्षस्य यमेन सह सम्बन्धः वर्तत इति धीया यमः औदुम्वरिकः कथ्यते इति मदनपारिजाते[11] उक्तमस्ति। एवमेतेषामश्वत्थादिवृक्षाणां महत्त्वं परिलक्ष्य मनुयाज्ञवल्क्यादिस्मृतौ स्नातकः मार्गे गच्छत् काले मार्गस्थ अश्वत्थादि वृक्षाणां परिक्रमणं कृत्वा गच्छेदित्युक्तमस्ति[12]। सम्प्रत्यप्येतेषां परिक्रमणं जनाः कुर्वन्ति। श्रीमद्भगद्गीतायामपि[13] अश्वत्थवृक्षः आत्मतत्त्वेन सहोपमीयते।तथैव बटपूजनस्यापि महत्त्वं दरीदृश्य तस्य नामानुसारं निर्णसिन्धौ[14] "वटसावित्रीव्रतं" भाद्रपदशुक्ला त्रयोदशीतः पूर्णिमां यावद्विचार्यते। स्मृतिचन्द्रिकायां[15] चन्दन-अगर्वादि पञ्चकर्दभानां लेपः देवपूजने प्रयुज्यते इति कथ्यते। एवमेते वनस्पतिजः तथा सुगन्धिताः भवन्तीति तत्रोक्तमस्ति। हेमाद्रिमतेन[16] त्रिणी सुगन्धानि द्रव्याण्यालोच्यन्ते। यथा त्वक् (दालचीनी), एला एवं पत्रकम् इति। कृत्यकल्पतरौ[17] देवपूजनार्थ केषां पुष्पाणां प्रयोगे को लाभो भवतीति प्रदर्शितः। यथा-

मालतीपुष्पस्य प्रयोगे देवसामीप्यं लभ्यते ।
करवीरः – स्वास्थ्यं तथा अतुलसम्पत्तिः प्राप्यते ।
मल्लिका – सहस्रविधमानन्दः प्राप्यते ।
पुण्डरीकः – कल्याणं, चीरस्थायी सम्पत्तिः, सुपत्नी च प्राप्यते ।
कब्जकः – सर्वोत्तममैश्वर्यं लभ्यते ।
नीलकमलः – निष्कलंकसम्पत्तिः अधिगम्यते।
मुकुरकः – कुष्ठरोगस्य निवारणं भवति।
बिल्व – धनधान्यं प्राप्यते।
अर्कः – सूर्येण कल्याणं प्राप्यते।
वकुलः – सुन्दरी कन्या प्राप्यते।
किंशुकः (पलाशः) – सूर्येण दुःखहरणं भवति ।
अगस्त्यः – इष्टदेवेन सफलतां प्रदीयते ।
अशोकः – सूर्येण त्रुटिनिवारणं भवति ।
वनमाला – भीतिः दूरी भवति ।
जपापुष्पं – सूर्येण दुःखः ह्रियते ।

पुनश्च तत्र विविधगन्धनिर्मितधूपानां देवतोद्देश्येन प्रयोगेण विभिन्नफलनिर्देशं वर्तते ।[18] यथा-

चन्दन – सूर्यस्य सामीप्यं लभ्यते।
अगरु – इष्टफलं प्राप्यते ।
वासकः – व्यापारे सफलतां प्राप्यते।
पिण्डाङ्ग – स्वास्थ्यं, श्रीः, कल्याणं च मिलति ।
कुण्डकः – कृतार्थता प्राप्तिर्भवति ।
सर्जरसः – सम्पत्तिलाभो भवति ।
गुग्गुलः – स्वास्थ्यलाभो भवति ।

पुनश्च धर्मशास्त्रे विभिन्नदेवतानां पूजनपद्धतौ विभिन्नवनस्पतीनां प्रयोगः विधीयते। यथा-

सूर्यपूजनार्थं अर्क-पलाश-अशोक-जपदीनां पुष्पाणां प्रयोगः तथैव शिवपूजानार्थं कुंकुमरञ्जितं, अक्षतः, दुर्वा, कुरः, कुशः, ताम्बूलपत्रं, पूगीफलं, बिल्वपत्रं, अर्क एवं कनेरपुष्पं च प्रयुज्यन्ते। परन्तु केतकीपुष्पस्य निषेधोऽत्र भवति। एवं भावेन कामदेवस्य पूजनार्थं आम्रमञ्जरि तथा अशोकपुष्पाणां विधानं वर्तते।

धर्मशास्त्रेऽनेके व्रतोपवासाश्च वनस्पतीनामाधारिताः भवन्ति। प्रायतः तत्र व्रतेषु फलाहारस्य विशेषमहत्त्वं दरीदृश्यते। यथा –

सर्पदंशनभयाद्विमुक्त्यर्थं नागपूजनावसरे करवीरजातिपुष्पादीनां व्यवहारः भवति। तथैव श्रावणमासि कृष्णपञ्चम्यां विहिते मनसापूजने नीमपत्राणां स्थापनं तथा भक्षणं विधीयते। हरितालिकाव्रते स्त्रियः नारिकेलतैलं तथा त्रिफलातैलं मिश्रित्य स्नानं कुर्वन्ति। गणेशपूजने दूर्वा दलेन पूजनस्य विशेषमहत्त्वं परिलक्ष्यते। दशहरापर्वणि नवान्नेन हविः देवत्तोद्देश्येन दीयते। नरकचतुर्दशीव्रते यमदेवतार्थं तिलयुक्तजलैः तर्पणं भवति। आश्विनपूर्णिमायां कौमुदीमहोत्सवे नवीनशस्यैः यज्ञो विधीयते। मकरसंक्रान्त्यां तिलव्रते तिलस्य विशेषमहत्त्वं वर्तते। यथा अत्र तिलयुक्तजलैः स्नानं, तिलाहुतिः, पितृणां कृते तिलाञ्जलिः, तिलभक्षणं, तिलदानञ्चेति। तथैव फाल्गुनकृष्णद्वादश्यां तिलद्वादशीव्रतेऽपि तिलस्नानं, तिलहोमः, तिलेन नैवेद्यं, तिलस्य तैलेन दीपप्रज्वलनं च विशेषः भवति। भाद्रपदशुक्लनवम्यां विल्ववृक्षस्य विशेषपूजनं भवति। एतद्

श्रीवृक्षनवमीव्रतमिति कथ्यते। बिल्ववृक्षे लक्ष्मी निवसति। अतः अस्यं नाम एवमस्ति। अस्मिन् व्रते बिल्ववृक्षस्याधः उसीत्वा दिनत्रयमुपवासस्य तथा एकलक्षात्मकशिवनामजपस्य विधानं वर्तते। अतः एतद् व्रतं त्रिरात्रव्रतमित्यपि कथ्यते हेमाद्रिना[19]। एतद्भिन्नं विल्वत्रिरात्रव्रतं ज्येष्ठपूर्णिमातः प्रारभ्यते। अत्र एकवर्षं यावत् रात्रौ बिल्वपूजनं भवति। पुनश्च आश्विनशुक्लसप्तम्यां बिल्वशाखापूजनव्रतं विधीयते। फाल्गुनशुक्लैकादश्यामामलस्येका-दशीव्रते आमलकी वृक्षस्याधः राधा-कृष्णयोः किम्बा लक्ष्मीनारायणयोः पूजनं विधीयते। अत्र धात्रीफलस्य जलैः स्नानेन तथा भक्षणेन मुक्तिः प्राप्यते। एवं प्रकारेण कदलीव्रतं, कुन्दचतुर्थी, कूष्माण्डदशमी, गुडतृतीया, गोधूमव्रतं, चम्पकचतुर्दशी, जयदासप्तमी, तुलसीविवाहः, दमनकभञ्जी, अशोकप्रतिपदा, होलिकोत्सवः, निम्बसप्तमी, बकुलामावस्या, मन्दारषष्ठी, मन्दारसप्तमी, मधूकव्रतं, मरिचसप्तमी, सर्षपसप्तमी, धान्यसप्तमी, वृक्षोत्सवादिषु च वनस्पतीनां वहुलप्रयोगः परिलक्ष्यते। किञ्च धर्मशास्त्रस्यान्यदंगं भवति प्रायश्चित्तम्। तत्रापि पर्णकृच्छ्रे, पुष्पकृच्छ्रे, फलकृच्छ्रे, मूलकृच्छ्रश्च विद्यते।

**पर्णकृच्छ्रः-** एतद् प्रायश्चित्तं पञ्चदिनात्मकं भवति। अत्र प्रतिदिनं पलाश-उदुम्बर-कमल-बिल्वपत्राणामुदकमेकैकं पीत्वा पञ्चमदिने कुशोदकं पानेन पर्णकृच्छः साध्यते इति याज्ञवल्क्येनोक्तम्[20]-

"पर्णोदुम्बरराजीवबिल्वपत्रकुशोरकैः।
प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः।।"

अत्रिमतानुसारमत्राश्वत्थपत्रस्यापि ग्रहणं भवेत्[21]। विष्णुधर्मसूत्रा-नुसारन्तु[22] कुश-पलाश-उदुम्बर-राजीव-शंखपुष्पी-वट-ब्राह्मी-सुवर्च-लादिपत्राणां क्वाथपानेन सर्वेषां पापानां नष्टं भवति। तथैव फलपुष्पमूलादिकृच्छ्राणां विषये उक्तमस्ति मार्कण्डेयपुराणे[23] यत्-

"फलैर्मासेन क्वथितः फलकृच्छ्रो मनीषिभिः।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा।।"
"मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते।।
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु।" इति

अपि च धर्मशास्त्रे फलसम्बन्धी कानिचनव्रतानि निर्दिष्टानि वर्तन्ते। यथा- फलतृतीयाव्रतं, फलत्यागव्रतं, फलव्रतं, फलषष्ठीव्रतं, फलसंक्रान्तिव्रतम्, फलसप्तमी, फलाहारप्रियव्रतञ्चेति ।

आधुनिकपर्यावरणविज्ञानस्य सन्दर्भे विचारयामश्चेद्यथा ज्ञायते यत् धर्मशास्त्रेषु क्रमशः वृक्षच्छेदनस्य निषेधः, वृक्षारोपणस्य पुण्यता, देववनसंरक्षणं, जैवविविधतारक्षणं,जलसंरक्षणं च इत्यादयः सिद्धान्ताः आधुनिक Environmental Ethics इत्यस्य पूर्वरूपाणि मन्यन्ते। यत्र धर्मशास्त्रेषु वनस्पतयः धार्मिकजीवनस्य आधारत्वेन, यज्ञानां आवश्यकद्रव्यत्वेन, देवपूजायाः मुख्योपकरणरूपेण, आयुर्वेदस्य मूलत्वेन, जैवविविधतायाः संरक्षकभावेन, सामाजिक-संस्कृतेः प्रतीकरूपेण च वर्णिताः सन्ति । यथा अश्वत्थः, वटः, बिल्वः, तुलसी, पलाशः, उदुम्बरश्च इत्यादयः न केवलं पूजनीयाः, अपि तु पर्यावरणीयदृष्ट्यापि अत्यन्तमहत्त्वपूर्णाः। तत्र केचन विद्वांसः धर्मशास्त्रेषु वनस्पतीनां पूजनं धार्मिकविश्वासमात्रम् इति मन्यते। परन्तु आधुनिकपर्यावरणविज्ञानं दर्शयति यत् पवित्रवनव्यवस्था (Sacred Groves), देववृक्षपरम्परा, तुलसीपूजा, वटसावित्री-व्रतम् इत्यादयः जैवविविधतासंरक्षणे प्रत्यक्षं योगदानं ददति। यथा पूर्वं प्रतिपादितम्। अतः धर्मशास्त्रीयपरम्परा वैज्ञानिकदृष्ट्यापि पुनर्मूल्यांकनस्य अपेक्षां करोति। यत्तु अधः प्रतिपाद्यते।

**Sustainable Development Goals (SDGs) इत्यनेन सह सम्बन्धः-**

धर्मशास्त्रीयसिद्धान्ताः निम्नलिखितेषु SDGs मध्ये प्रत्यक्षयोगदानं कुर्वन्ति । यथा-

- SDG 13 – Climate Action
- SDG 15 – Life on Land
- SDG 3 – Good Health and Well-being
- SDG 11 – Sustainable Cities
- SDG 12 – Responsible Consumption

अतः धर्मशास्त्रं केवलं धार्मिकग्रन्थः न, अपितु Sustainable Civilization Model इति वक्तुं शक्यते ।

**निष्कर्षः-** अध्ययनेन सिद्ध्यति यत् धर्मशास्त्रेषु वनस्पतीनां महत्त्वं धार्मिकसीमां अतिक्रम्य पर्यावरणसंरक्षणे, स्थायिविकासे, सामाजिकनैतिकतायां तथा वैश्विकपर्यावरणनीतिषु अत्यन्तोपयोगि अस्ति। भारतीयज्ञानपरम्परा आधुनिकविश्वस्य पर्यावरणसंकट-समाधाने महत्त्वपूर्णं योगदानं दातुं समर्था अस्ति ।

**सहायकग्रन्थसूची-**

1)मनुस्मृतिः-श्री पं. हरगोविन्दशास्त्री, चौखम्भा संस्कृत भवन, वाराणसी, 2018

2)याज्ञवल्क्यस्मृतिः- डा. उमेशचन्द्र पाण्डेय,चौखम्भा संस्कृत संस्थान, वाराणसी, 2014

3)विष्णुस्मृतिः- केशववैजयन्तीसहिता, संपा.वि. कृष्णमाचार्य, आड्यार लाइब्रेरी, माड्रास, 1964

4)स्मृतिचन्द्रिका (देवणभट्टः)- नागप्रकाशन, दिल्ली, 1988

5)कृत्यकल्पतरुः- चण्डेश्वरठाकुरः, एशियाटिक सोसाइटि आफ वेङ्गल, कोलकाता,1931

6)चतुर्वर्गचिन्तामणिः- हेमाद्रिभट्टः, चौखम्भा संस्कृत संस्थान, वाराणसी,1985

7)स्मृतिसन्दर्भः- नागप्रकाशन, दिल्ली,1988

8)स्मृतिसारसंग्रहः- विश्वनाथमिश्रः, संपा. डा. अतुलकुमार नन्दः, पुरी, 2001

9)मदनपारिजातः- एशियाटिक सोसाइटि आफ वेङ्गल,कोलकाता

10) निर्णयसिन्धुः म. म. श्रीव्रजरत्नभट्टाचार्य, चौखम्बाविद्याभवन, वाराणसी, 2022

11) महाभारतम्- गीताप्रेस,गोरखपुर,उत्तर प्रदेश

12) श्रीमद्भगवद्गीता-शाङ्करभाष्य,गीताप्रेस,गोरखपुर,उत्तर प्रदेश

13) https://share.google/flvM9mfKchN6Wrp24

14) United Nations. (2015). Transforming our world: The 2030 Agenda for Sustainable Development.

15) World Commission on Environment and Development. (1987). Our Common Future. Oxford University Press.

**पाद टिप्पणी: -**

[1]मनुस्मृति १.४७

[2]महा.अनु.पर्व. ५८/ २३-३२

[3]वौ.ध.सू. २,३.२५

[4]विष्णु.ध.सू.19.4

[5]हारि.स्मृ.९.१२०

[6]चतु.चि.दान.ख.पृ.१०३०-३२

[7]तत्रैव.पृ.१०३३-४७

[8]व.ध.सू. १९.११-१२, वि.ध.सू. ५.५५.५९

[9]स.ग.सू. पिर. ४.१०

[10] कृत्य, शान्तिखण्ड अ. ७, हेमाद्रि.व्र.ख. १.४७

[11] म.पारि.प्रक. २९६

[12] मनु.४.२९, या.स्मृ.१.१३३

[13] श्रीमद् भ.गी. १५.१

[14] नि.सि.पृ. १००

[15] स्मृ.च.पृ. २१०

[16] चतु.चिन्ता.व्रतखण्ड १.४४

[17] कृत्य.क.व्रत.पृ. १८०-८१

[18] तत्रैव पृ. १८२-१८३

[19] हेमाद्रि. व्र.ख.. २.३१८

[20] या.स्मृ. ३.३१६

[21] अ.स्मृ. ११६-११७

[22] वि.ध.सू. ४६.२३

[23] या. स्मृ.मिता. ३.३१६